# Bharatakhyah Svadeshah

# ભારતાખ્યઃ સ્વદેશઃ

## Document Information

Text title : Bharatakhyah Svadeshah

File name : bhAratAkhyaHsvadeshaH.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Dr. Ramakant Shukla

Proofread by : Mandar Kulkarni

Acknowledge-Permission: Dr. Ramakant Shukla, Devavani Parishad, Delhi

Latest update : May 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2024

*sanskritdocuments.org*

# ભારતાખ્યઃ સ્વદેશઃ

સલિલનિધિ તરઙ્ગૈર્ધૌતપાદામ્બુજોઽસૌ
હિમગિરિશુભહાસૈર્ભાસયન્નાનનં સ્વમ્ ।
પ્રકૃતિકલ વિલાસૈર્મોદકારી જનાનાં
જયતિ જગતિ નિત્યં ભારતાખ્યઃ સ્વદેશઃ ॥ ૧॥

શિખિકુલકલકેકા કાકલી કોકિલાનાં
કલયતિ કલકાલે કાન્તકાન્તારપ્રાન્તાન્ ।
પ્રકૃતિકલવિલાસાન્ યત્ર પશ્યન્તિ નિત્યં
વિકચકમલનેત્રૈર્હર્ષફુલ્લૈસ્સરાંસિ ॥ ૨॥

નવપરિમલગન્ધૈર્મન્દશીતૈઃ સમીરૈઃ
પ્રકૃતિનવવધૂટીસ્વાઙ્ગરાગૈઃ પરાગૈઃ ।
ધૃતમધુકરપુઞ્જૈર્ગુઞ્જિતૈર્મઞ્જુકુઞ્જૈ-
ર્વિલસતિ મધુમત્તો યત્ર રાજા ઋતૂનામ્ ॥ ૩॥

ભૃગુકલકલનાદૈઃ કિઞ્ચિદાભાષયન્ત્યો
જલપતનજફેનૈર્મોદમાના હસન્ત્યઃ ।
મરકત તૃણવાસૈરાવૃતા યત્ર લુબ્ધાઃ
વિદધતિ ગિરિમાલાઃ સ્વૈઃ પયોધૃદ્ભિરાશાઃ ॥ ૪॥

ભ્રમિકરજલવીચિભ્રૂ કટાક્ષાન્ ક્ષિપન્ત્ય-
સ્તટગતખગશબ્દૈઃ સિન્ધુમાકારયન્ત્યઃ ।
ધૃતબહુવિધ રત્નં યાન્તિ લાવણ્યપૂર્ણં
બહુનદિનદધારાઃ યત્ર નિત્યં નદીશમ્ ॥ ૫॥

વનવિટપિકદમ્બૈઃ કેલિલોલાકદમ્બૈ-
ર્મુરલિવટસ નાથૈર્ભૃઙ્ગકૃષ્ણૈઃ સ્થલૈશ્ચ ।
ચલરવિતનયાયાઃ શ્યામિકાભિશ્ચ યત્રા-
નુભવતિ ખલુ વૃન્દાકાનનં કૃષ્ણમીશમ્ ॥ ૬॥

ભવતિ મૃદુલશોભા સર્ષપાણાં વસન્તે
શરદિ કમલરાશિઃ પ્રસ્ફુટો જાયતે ચ ।
હરિતવસનશોભાં વર્દ્ધયન્તી પૃથિવ્યા
વિલસતિ તૃણરાજિર્યત્ર વર્ષર્તુકાલે ॥ ૭॥

કનકગુણનિબદ્ધૈઃ કુન્તલાનાં કલાપૈઃ
સમ ઇહ ચલવિદ્યુદ્દામશોભઃ પ્રસન્નઃ ।
કરિગણ ઇવ કૃષ્ણો નીરગણ્ડૂષકારી
સ્વનતિ મૃદુગભીરં તોયવાહઃ સુકાલે ॥ ૮॥

ક્વ મિલતિ વિષધૃ દ્ભિર્મિત્રતા ચન્દનાનાં ?
ક્વ ચ મલયજગન્ધો યાતિ ધીરઃ સમીરઃ ?
ક્વ ચ વિતરતિ મોદં શુભ્રકાશ્મીરશોભા ?
પ્રકૃતિકલવિલાસો ભારતાદન્યતઃ ક્વ ? ॥ ૯॥

ક્વ ચ મુનિગણપૂર્ણા આશ્રમાઃ સમ્ભવન્તિ ?
નવ કિસલયરાગા યત્ર ચિત્તં હરન્તિ ।
ત્યજતિ ઋજુમુનીનાં ક્રોડમાગત્ય યત્ર
નવમૃગસુતવૃન્દં નાભિનાલાનિ, ચિત્રં ! ॥ ૧૦॥

ક્વચિદપિ હરિણાલી સઞ્ચરન્તી ચકાસ્તિ
ક્વચિદપિ ચ ગજાનાં યત્ર યૂથં પ્રસન્નમ્ ।
ક્વચિદપિ દૃઢનાદો યત્ર કણ્ઠીરવાણાં
ઉપવન-વનભાગા ઈદૃશાઃ કુત્ર સન્તિ ? ॥ ૧૧॥

ધવલજલ પવિત્રા પાપનાશે પ્રસક્તા,
ક્વણિતજલતરઙ્ગા કચ્છપીધારિણી ચ ।
જલ ગણશુચિકર્ત્રી નીલકણ્ઠાસના ચ
વિલસતિ શુભગઙ્ગા શારદા ચ ક્વ શુભ્રા ? ॥ ૧૨॥

જય ભારતભૂમે ! (સંસ્કૃતકાવ્યમ્)
રચના - ડૉ. રમાકાન્ત શુક્લઃ

Proofread by Mandar Kulkarni

*Bharatakhyah Svadeshah*

pdf was typeset on May 11, 2024

Please send corrections to *sanskrit@cheerful.com*